# Shri Subrahmanya Shatkam

# શ્રીસુબ્રહ્મણ્યષટ્કમ્

## Document Information

Text title : SubrahmaNya Shatkam 1

File name : subrahmaNyaShaTkam.itx

Category : subrahmanya, ShaTkam

Location : doc_subrahmanya

Proofread by : Sreenivasa Rao Bhagavatula, NA

Description/comments : From stotrArNavaH 07-01

Latest update : February 7, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 2, 2023

*sanskritdocuments.org*

# Shri Subrahmanya Shatkam

## શ્રીસુબ્રહ્મણ્યષટ્કમ્

શરણાગતમાતુરમાધિજિતં
કરુણાકર કામદ કામહતમ્ ।
શરકાનનસમ્ભવ ચારુરુચે
પરિપાલય તારકમારક મામ્ ॥ ૧॥

હરસારસમુદ્ભવ હૈમવતી-
કરપલ્લવલાલિત કમ્રતનો ।
મુરવૈરિવિરિઞ્ચિ મુદમ્બુનિધે
પરિપાલય તારકમારક મામ્ ॥ ૨॥

શરદિન્દુસમાનષડાનનયા
સરસીરુહચારુવિલોચનયા ।
નિરુપાધિકયા નિજબાલતયા
પરિપાલય તારકમારક મામ્ ॥ ૩॥

ગિરિજાસુત સાયકભિન્નગિરે
સુરસિન્ધુતનૂજ સુવર્ણરુચે ।
શિખિતોકશિખાવલવાહન હે
પરિપાલય તારકમારક મામ્ ॥ ૪॥

જય વિપ્રજનપ્રિય વીર નમો
જય ભક્તજનપ્રિય ભદ્ર નમો ।
જય શાખ વિશાખ કુમાર નમઃ
પરિપાલય તારકમારક મામ્ ॥ ૫॥

પરિતો ભવ મે પુરતો ભવ મે
પથિ મે ભગવન્ ભવ રક્ષ ગતિમ્ ।
વિતરાશુ જયં વિજયં પરિતઃ
પરિપાલય તારકમારક મામ્ ॥ ૬॥

ઇતિ કુક્કુટકેતુમનુસ્મરતાં
પઠતામપિ ષણ્મુખષટ્કમિદમ્ ।
ભજતામપિ નન્દનમિન્દુભૃતો
ન ભયં ક્વચિદસ્તિ શરીરભૃતામ્ ॥ ૭॥

ગાઙ્ગેયં વહ્નિગર્ભં શરવણજનિતં જ્ઞાનશક્તિં કુમારં
બ્રહ્મણ્યં સ્કન્દદેવં ગુહમચલભિદં રુદ્રતેજઃસ્વરૂપમ્ ।
સેનાન્યં તારકઘ્નં ગજમુખસહિતં કાર્તિકેયં ષડાસ્યં
સુબ્રહ્મણ્યં મયૂરધ્વજરથસહિતં દેવદેવં નમામિ ॥ ૮॥

॥ ઇતિ શ્રીસુબ્રહ્મણ્યષટ્કં સમ્પૂર્ણમ્ ॥

Proofread by Sreenivasa Rao Bhagavatula

*Shri Subrahmanya Shatkam*

pdf was typeset on January 2, 2023

Please send corrections to *sanskrit@cheerful.com*